**उमाकट** पु० उमाया अतस्या हरिद्राया वा रजः कटच्। अतस्या हरिद्रायाश्च रजसि।

**उमागुरु** पु० ६त०। हिमालये तस्य उमायाजनकत्वात्तथात्वम्। उमाजनकादयोऽप्यत्र। तस्याश्च तदुत्पत्तिकथा शिवपु० दृश्या।

**उमाचतुर्थी** स्त्री उमायाजन्मदिनम् चतुर्थी। ज्यैष्ठशुक्लचतुर्थ्याम् "ज्यैष्ठशुक्लचतुर्थ्यान्तु जाता पूर्व्वमुमा सती। तस्मात् सा तत्र संपूज्य स्त्रीभिः सौभाग्यवृद्धये" ब्र०पु०

**उमापति** पु० ६त०। महादेवे। स च यथा तामुपयेमे तत्कथा शिवपु० दृश्या तन्मूलकं कुमारे च वर्णिता एवमन्यत्रापि पुराणे दृश्या। "मेनां यावत् सती प्राप्य हिमाचलपतिव्रताम्। उमरूपा हि तपसा पतिं प्राप पिनाकिनम्"। काशीख० उमाधवादयोऽप्यत्र

**उमावन** न०उमाप्रीतये वनमत्र। पुरभेदे शोणितपुरे हेम०

**उमासहाय** पु० ६त०। महादेवे दुर्गासहायतत्सहचरादयोऽप्यत्र

**उमासुत** पु०६त०। कार्त्तिकेये। तत्कथा अग्निकुमारशब्दे ५५प्ट०शिवपुराणे च दृश्या। उमातनयपार्वतीसुतादयोऽप्यत्र

**उम्बर** पु०उमित्यव्यक्तशब्दं वृणाति वृ अच्। १द्वारोर्द्धकाष्ठे, २गन्धर्वभेदे च। "उम्बरस्तुम्बुरुश्चैव जगुरन्ये च षड्गणान्" हरि० १२८अ०।

**उम्बी** स्त्री उम्+वा—क गौरा० ङीष् पृषो०वस्य बः। "मञ्जरी त्वर्द्धपक्वा या यवगोधूमयोर्भवेत्। तृणानलेन सम्पुष्टा बुधैरुम्बीति सा स्मृता" इति भा०प्र०उक्तायाम् अर्द्धपक्वयवगोधूमयोर्मञ्जर्य्याम्। "उम्बी कफप्रदा बल्या लघ्वी पित्तानिलापहा" भा०प्र०।

**उम्बुर** पु० उम्+वृ—क उत् रपरः। द्वारोर्द्धकाष्ठे।

**उम्भि** त्रि०उम्भ—इन्। पूरके। ततः कत्त्र्या०जाताद्यर्थे ढकञ्। औम्भेयक तज्जातादौ त्रि०

**उम्य** न० उमाया अतस्या भवनं क्षेत्रम् वा यत्। अतसीभवनक्षेत्रे पक्षे खञ् औमीन तत्रार्थे न०

**उम्लोचा** स्त्री अप्सरोभेदे। "कतुस्थला घृताची च विश्वाची पूर्व्वचित्यपि। उम्लोचेति च विख्याता" भा०आ०१२३अ०

**उर** गतौ सौ०पर०सक०सेट्। ओरति औरीत् उवोर ऊरतुः

**उर** पुंस्त्री उर—क। १मेषे स्त्रियाम् अजा०टाप्। "अता वि नेमिरेषामुराम्" ८,३४,३, 'उरां मेषीम्' भा०२गन्तरि त्रि०। "उरामथिरा वयुनेषु" ऋ० ८,६६,८।

**उरःसूत्रिका** स्त्री ७त०। मुक्ताहारे अमरः।

**उरग** पुंस्त्री०उरसा गच्छति उरस्+गम—ड सलोपश्च। १सर्पे, स्त्रियां जातित्वात् ङीष् पादशून्यतया उरसैव तेषां हि गमनम्। "भित्त्वोत्थितं भूमिमिवोरगाणाम्" "बिलमग्नाविवोरगौ" 'अङ्गुलीवोरगक्षता' रघुः। २तद्देवताके अश्लेषानक्षत्रे। 'उरगविधिशताख्याः शर्वरीनाथवारे" ज्यो०त०। ४सीसके तस्य नागबीजजत्वेनाऽभेदोपचारात्तथात्वम्। अहिशब्दे ५८१ पृ० विवृतिः।

**उरगभूषण** पु० उरगोभूषणमस्य। सर्पभूषणे महादेवे

**उरगराज** पु० ६त० टच् समा०। १सर्पराजे वासुकौ। उरगोराजेव उपमि०स०। २महासर्पे च। "प्रहर्त्तुरेवोरगराजरज्जवः" माघः उरगेशतदिन्द्रादयोऽप्युभयत्र। "उरगेन्द्रमूर्द्धरुहरत्नसन्निधेः" माघः। [तथात्वम्।

**उरगस्थान** न०६त०। पाताले तेषां तत्रस्थितत्वात् पातालस्य

**उरगाशन** पु०उरगानश्नाति अश—ल्यु ६त०। सर्पभक्षके १गरुड़े च २मयूरे उरगभक्षादयोऽप्यत्र। "स्वावासभागमुरगाशनकेतयष्ट्या" माघः।

**उरङ्ग** पुंस्त्री उरसा गच्छति उरस्+गम-ड नि०। सर्पे स्त्रियां जातित्वात् ङीष्। [ सर्पे स्त्रियां जातित्वात् ङीष्।

**उरङ्गम** पुंस्त्री उरसा गच्छति उरस्+गम—खच् सलोपः।

**उरण** पुंस्त्री ऋ—क्यु, धातोरुच्च रपरः। १मेषे स्त्रियां जातित्वात् ङीष्। "वृकीवोरणमासाद्य मृत्युरादाय गच्छति" भा०शा०६५ अ०। "य उरणं जघान नव चख्वांसं नवतिं च बाहून्" ऋ०२,१४,४,२दद्रुमवृक्षे पु०स्वामी।

**उरणाक्ष** पु० उरणस्य मेषस्य अक्षीव अक्षि पुष्पं यस्य। दद्रुघ्ने (दादमर्द्दन) वृक्षे। स्वामी तु उरणाख्यस्तत्रार्थे इत्याह। तन्मते उरणस्याख्या आख्या यस्येति विग्रहः

**उरभ्र** पुंस्त्री उरु उत्कटं भ्रमनि भ्रम-ड पृषो० उलोपः। १मेषे स्त्रियां जातित्वात् ङीष् २दद्रुमवृक्षे पु० स्वामी। तस्येदम् अण्। औरभ्र मेषमांसादौ "हविषाऽन्नेन वै मासं पायसेन च वत्सरम्। मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः। ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमम्। मासाभिवृद्ध्या तृप्यन्ति दत्तेनेह पितामहाः" याज्ञ०। "दर्पिताश्वाङ्कखड्गाह्वमहिषोरभ्रकुञ्जराः" सुश्रुते पशुषु तस्य दर्पितत्वमुक्तम् स च ग्राम्यपशुः "अश्वाश्वतरगोखरोष्ट्रवस्तोरभ्रमेदःपुच्छप्रभृतयो ग्राम्याः" सुश्रु० तन्मांसगुणास्तत्रैव "ग्राम्या वातहराः सर्वे वृंहणाः कफपित्तलाः। मधुरा रसपाकाभ्यां दीपना बलवर्द्धनाः" "वृंहणं मांसमौरभ्रं पित्तश्लेष्मावहं गुरु"।